श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ७२

*This document** has been prepared by

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः
श्रीमते कृष्णाय परब्रह्मणे नमः
श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ७२

*अक्रूरागमनवर्णनम्*

कंसोऽथ नारदगिरा व्रजवासिनं त्वा-
    माकर्ण्य दीर्णहृदयः स हि गान्दिनेयम्।
आहूय कार्मुकमखच्छलतो भवन्त-
    मानेतुमेनमहिनोदहिनाथशायिन्॥ १॥

अक्रूर एष भवदङ्घ्रिपरश्चिराय
    त्वद्दर्शनाक्षममनाः क्षितिपालभीत्या।
तस्याज्ञयैव पुनरीक्षितुमुद्यतस्त्वा-
    मानन्दभारमतिभूरितरं बभार॥ २॥

सोऽयं रथेन सुकृती भवतो निवासं
    गच्छन् मनोरथगणांस्त्वयि धार्यमाणान्।
आस्वादयन् मुहुरपायभयेन दैवं
    सम्प्रार्थयन् पथि न किञ्चिदपि व्यजानात्॥ ३॥

द्रक्ष्यामि वेदशतगीतगतिं पुमांसं
    स्प्रक्ष्यामि किंस्विदपि नाम परिष्वजेयम्।
किं वक्ष्यते स खलु मां क्वनु वीक्षितः स्या-
    दित्थं निनाय स भवन्मयमेव मार्गम्॥ ४॥

भूयः क्रमादभिविशन् भवदङ्घ्रिपूतं
    वृन्दावनं हरविरिञ्चसुराभिवन्द्यम्।
आनन्दमग्न इव लग्न इव प्रमोहे
    किं किं दशान्तरमवाप न पङ्कजाक्ष॥ ५॥

www.prapatti.com

पश्यन्ननवन्दत भवद्विहृतिस्थलानि
 पांसुष्ववेष्टत भवच्चरणाङ्कितेषु।
किं ब्रूमहे बहुजना हि तदापि जाता
 एवं तु भक्तितरला विरलाः परात्मन्॥ ६॥

सायं स गोपभवनानि भवच्चरित्र-
 गीतामृतप्रसृतकर्णरसायनानि।
पश्यन् प्रमोदसरितेव किलोह्यमानो
 गच्छन् भवद्भवनसन्निधिमन्वयासीत्॥ ७॥

तावद्ददर्श पशुदोहविलोकलोलं
 भक्तोत्तमागतिमिव प्रतिपालयन्तम्।
भूमन् भवन्तमयमग्रजवन्तमन्त-
 र्ब्रह्मानुभूतिरससिन्धुमिवोद्वमन्तम्॥ ८॥

सायन्तनाप्लवविशेषविविक्तगात्रौ
 द्वौ पीतनीलरुचिराम्बरलोभनीयौ।
नातिप्रपञ्चधृतभूषणचारुवेषौ
 मन्दस्मितार्द्रवदनौ स युवां ददर्श॥ ९॥

दूराद्रथात्समवरुह्य नमन्तमेन-
 मुत्थाप्य भक्तकुलमौलिमथोपगूहन्।
हर्षान्मिताक्षरगिरा कुशलानुयोगी
 पाणिं प्रगृह्य सबलोऽथ गृहं निनेथ॥ १०॥

नन्देन साकममितादरमर्चयित्वा
 तं यादवं तदुदितां निशमय्य वार्ताम्।
गोपेषु भूपतिनिदेशकथां निवेद्य
 नानाकथाभिरिह तेन निशामनैषीः॥ ११॥

चन्द्रागृहे किमुत चन्द्रभगागृहे नु
 राधागृहे नु भवने किमु मैत्रविन्दे।



www.prapatti.com

धूर्तो विलम्बत इति प्रमदाभिरुच्चै-
राशङ्कितो निशि मरुत्पुरनाथ पायाः॥ १२॥

**********

www.prapatti.com